# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**–शास्त्री–१ (SEM-2) | **प्रश्नपत्रम्** – ७ (Old & New) | **गुणाः** – ७० |
| **विषयः** – वास्तुशास्त्रम् | **कोड- CE- 122** | **समयः** – ११ तः २ |
| **दिनाङ्कः** – १८/०४/२०१९ | **सन्दर्भग्रन्थः**–वास्तुतत्त्वविवेकः | |

---

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** १०

१ गृहस्थस्य गेहं विना सर्वकार्यं न सिद्ध्यतो गेहिनां चैव गेहम् ।
अवश्यं सुरम्यं पवित्रेऽतिभूमौ विनिर्माय कार्या क्रिया सर्वदैव ॥

२ स्ववर्गं द्विगुणं कृत्वा परवर्गेण योजयेत् ।
अष्टभिस्तु हरेद् भागं योऽधिकः स ऋणी भवेत् ॥

३ लग्ने गुरौ रवौ षष्ठे द्यूने ज्ञे भार्गवे सुखे ।
मन्दे त्रिगे कृतं तिष्ठेन्मन्दिरं शरदां शतम् ॥

**प्रश्नः २ अधोलिखितयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** १०

१ गृहारम्भे वृषभचक्रम् ।

२ भूमिशोधनविधानम् ।

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** १०

१ वक्रान् रूक्षानवप्लुष्टान् दुःस्थितानपि च द्रुमान् ।
वर्जयेद्द्रवनशाखांश्च द्व्येकशाखान्वितांस्तथा ॥

२ पूर्वेण यदि बदर्या वल्मीको दृश्यते जलं पश्चात् ।
पुरुषैस्त्रिभिरादेश्यं श्वेता गृहगोधिकार्द्धनरे ॥

३ द्वागिशाविलहस्तमब्धवदनं ताणं त्वलिन्दादिकम् ।
नैष्वायादिकमीरितं तृणगृहं नान्येषु गेहेष्विदम् ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि सविस्तरं वर्णनं करोतु ।** १०

१ प्रतिमाप्रतिष्ठाविचारः ।

२ चरणीविचारः ।

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** १०

१ आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ।
उद्धृतासि वराहेण सशैलवनकानने ॥

२ पार्वती बिल्ववृक्षस्थां लक्ष्म्यौ च तुलसीगतम् ।
आदौ सर्वं वृक्षमयं पूर्वं विश्वमजायत ॥

३ धरा चोच्या दक्षिणे च नैर्ऋते पश्चिमे तथा ।
वायुकोणे महीदेव जगपृष्ठं विधीयते ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि सविस्तरं वर्णनं करोतु । १०**

१ नक्षत्रादिवनम् ।

२ शिलान्यासविधिः ।

**प्रश्नः ७ दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ वर्गाः कति सन्ति?

२ श्वेतवर्णा भूमिः कस्य कृते वर्तते?

३ गृहे सिंहसंक्रान्त्यां कस्मिन् कोणे खातखननं कर्तव्यम्?

४ ध्वजस्य सम्बन्धः कया दिशा सह वर्तते?

५ गृहारम्भे कानि नक्षत्राणि शुभानि सन्ति?

६ शूलयोगे कति नाड्यः त्याज्याः भवन्ति?

७ गृहे पाकशाला कुत्र श्रेष्ठा भवति?

८ देवतागारः कस्मिन् दिशि श्रेष्ठः?

९ दक्षिणदिशि शिरः कृत्वा शयने को लाभः भवति?

१० राजगृहस्य विस्तारः कतिहस्तात्मकः भवति?

११ गर्गानुसारं कस्यां दिशि मथस्थं निषेधः?

१२ तपस्य अर्थात् कः मासः?

१३ चरसंज्ञकनक्षत्राणि कानि सन्ति?

१४ केन्द्रस्थानानि कानि? लिखत ।

१५ वास्तुसमये कौ द्वौ वासरौ निषिद्धौ?

०००